**SHARADA** (A Peer-Reviewed Journal), [Vol. 1, No. 2, Whole No. 2, June 2026], ISSN: 3102-0658 (P)

# कारकत्वविमर्शः

**हरिप्रसादभण्डारी**

*माध्यमिकशिक्षकः श्रीशारदा–संस्कृत–माध्यमिक–विद्यालयः*

bhandarihp2050@gmail.com

https//orcid.org/ 0009-0006-1160-4805

https://doi.org/10.3126/srj.v1i2.99152

**शोधसारः**

*प्रस्तुतेऽस्मिन् शोधप्रबन्धे कारकत्वविषये विश्लेषणः प्रस्तुतो विद्यते। अत्र सर्वप्रथमं कारकस्य परिचयं विधाय षड्विधकारकाणां सोदाहरणं भेदं प्रदर्श्य सम्बन्धस्य कथं कारकं न इति विषये चर्चा विहिता अस्ति। तत्र च कारकसम्बद्धा पौरस्त्यपाश्चात्यादिसम्मतं मतभेदं निरूप्य तत्तन्मतानामाचार्याणां मतानामालोडनं च कृत्वा विमर्शनं क्रियते। तेनैव प्रकारेण अत्र कारकत्वविषये पौरस्त्यपाश्चात्यसम्बद्धानामाचार्याणां मतं सम्यक्प्रकारेण स्थापयित्वा तेषां कारकसम्बद्धमतानां सूक्ष्मरूपेण विमर्शनं क्रियन्ते।*

**शब्दकुञ्जीः** कारकः, कर्ता, सम्प्रदानम्, अधिकरणः, विभक्तिः।

## विषयप्रवेशः

भाषा हि जनानां भावाभिव्यक्तये सशक्तं साधनम्। अन्यैरपि चेष्टादिभिः साधनैर्भावाभिव्यक्तिस्तु सम्भवति किन्तु तत्र सम्पूर्णता न सम्भवति। भाषा एव सा शक्तिर्यया मनुष्यः पशुतो भिद्यते (पृथक्क्रियते) तेनैव वाङ्नाम दैवी शक्तिः। भाषा हि समुदायस्य वाङ्निधिः। तथा चोक्तमेव ' तां विश्वरुपाः पशवो वदन्ति' (पतञ्जलिमहाभाष्यम्.पृ.१३२)इति। विश्वरूपा इति समुदायसम्बद्धाः पशव इति प्राणिन उपलक्षणाज्जनाः वदन्ति इति सुखेन उच्चारणं कुर्वन्तीत्याशयः। अनेन भाषायाः स्वरूपं व्याख्यातं भवति, यथा भाषा नाम सा वाक् या खलु कण्ठताल्वादिभिरुच्चारणस्थानैरुच्चार्यते। अर्थात् 'उच्चारणावयवेभ्यः समुच्चारितानां सार्थकध्वनिसमुहानां समष्टिरेव भाषा कथ्यते' (भाषा परिचयः.पतञ्जलि.पृ.८७)।

यस्या कस्या अपि भाषायाः व्याकरणं भवति। व्याकरणं नाम व्याक्रियन्ते – व्युत्पाद्यन्ते साधुशब्दाः अनेनेति व्याकरणम्। तेनैव कथितम्–

यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम्।
स्वजनः श्वजनो मा भूत सकलं शकलं सकृच्छकृत्।। (व्याकरणपरिचयः.प्रथमो भागः.पृ.१२)

पुरातनतोऽद्यतनपर्यन्तं विश्वेष्वस्मिन् सर्वासु भाषासु वैज्ञानिकतम्, सूत्रबद्धम्, प्राचीनम्, सुस्थिरतम्, सर्वजनमान्यतमञ्च पाणिनीयव्याकरणमेवास्ति। तत्र व्याकरणस्य एकः प्रमुखपक्षः कारकप्रकरणमप्यस्ति। सिद्धान्तकौमुद्याः प्रकरणरचनायां कारकप्रकरणमप्येकं प्रकरणम्। करोति इति व्युत्पत्या कारकशब्दो निष्पद्यते। अत्र डु कृञ् करणे धातोः कर्तरि ण्वुल्प्रत्यये सति "युवोरनाकौ" (पाणिनिसूत्रम्.७.१.१)। अनेन सूत्रेण अकादेशे ऋकारस्य वृद्धौ कृदन्तत्वात् प्रातिपदिकसंज्ञायां स्वादिकार्ये कारकमिति। कर्ता इति तस्य सामान्योऽर्थः।

परमेतावन्मात्रेणार्थेन व्याकरणे कार्यं न चलति। अतोऽस्य कश्चन विशिष्टोऽर्थः स्वीकरणीयः। स च क्रियानिष्पादकत्वरूपः, क्रियाजनकत्वरुपो वा। अयञ्चार्थः कारकपदस्यान्वर्थतया निःसरति। लघ्वक्षरायां संज्ञायां कर्तव्यायां कारकम् इति महत्याः संज्ञायाः करणेनान्वर्थता विज्ञायते। अतो यत्क्रियाजनकं भवति, क्रियानिष्पादकं वा भवति तत्कारकं भवतीति विषयः सुविस्तरं विमृश्यते।

## लेखसमस्या/लेखोद्देश्यम्

प्रकृतशोधस्य कारकत्वविमर्शः इति विषयके इमाः समस्या भवन्ति।

क) कारकस्य सामान्यं स्वरूपं किम् ?

ख) कारकं कतिविधं ? तच्च किम् ?

ग) सम्बन्धस्य कथं कारकं न स्वीकृतम् ?

घ) कारकसम्बन्धी पौरस्त्यपाश्चात्यानां कीदृशं मतम् ?

प्रस्तुतलेखस्य कारकत्वप्रकाशनमेव प्रमुखं प्रयोजनं तदवगमनमेव प्रमुखं उद्देश्यं विद्यते। तदङ्गत्वेन निम्नविषयाणामवगमनमुद्देश्यं भवति।

क) कारकस्य सामान्यं स्वरूपमवबोधनम्।

ख) षड्विधकारकाणां परिचयप्रदर्शनम्।

ग) सम्बन्धस्य तु कारकं न इति निश्चयः।

घ) कारकसम्बन्धी पौरस्त्यपाश्चात्यानां मतविवेचनम्।

## शोधविधिः

कारकत्वाविमर्शः तदन्तर्भूतेविषये स्थित्वा सूक्ष्मरुपेणान्वेषणेन विषयस्य गाम्भिर्यमुद्घाटनीयं भवति। आधुनिकशोधविध्यन्तर्गत–वर्णनात्मकशैलीमनुसृत्य शोधपत्रमिदं प्रस्तुतं भविष्यति। अस्मिन् शोधपत्रे सम्बद्धविषयकग्रन्थाध्ययनम्, अध्ययनार्थं सामग्रीसङ्कलनम्, विद्वज्जनैः सह परामर्शकरणम्, पुस्तकालयस्यप्रयोगश्चेत्यादिविधयः आवश्यकतानुसारेण प्रयुक्ता भविष्यन्ति। प्रस्तुतेऽस्मिन् शोधकार्ये प्राधान्येन व्याख्यानात्मकप्रविधिरङ्गीक्रियते, तेनैव च विश्लेषणात्मकप्रविधिना कारकत्वविमर्शनं निगम्यते।

## कारकस्य परिचयस्तथा तत्सम्बन्धीनि विविधानि मतानि

क्रियाकारकयोः पारस्परिकी आकाङ्क्षा भवति – एकस्मिन् सति अपरस्याकाङ्क्षा भवति। अर्थात् क्रिया कारकम्, कारकञ्च क्रियामपेक्षते। एकस्य स्थितिरन्यस्य स्थितिं विना न सम्भवति। गच्छतीति क्रियामात्रकथने लेखने वा नार्थः पूर्णो भवति। को गच्छति? कुतो गच्छति ?कथं गच्छति ?इत्येवंरूपेण आकाङ्क्षा नियतोदिता भवति। तत्र कर्त्रादिवाचकानां रामादिपदानां सन्निवेशेन सा शान्ता भवति रामो गच्छति, विद्यालयं गच्छति, गृहाद् गच्छति, पठनाय गच्छति इत्येवंरुपेण। एवं राम इत्यादिमात्रप्रयोगेणापि नाकाङ्क्षा शान्ता भवति।

एतावता क्रियाकारकयोर्नित्यसम्बन्धो विभाति। स सम्बन्धोऽन्वयव्यतिरेकाभ्यामपि साधयितुं शक्यते। तत्सत्वे तत्सत्त्वमन्वयो भवति, तदभावे तदभावश्च व्यतिरेकः। एवञ्च कारकसत्वेऽपेक्षिता क्रिया समुत्पद्यत एव, तदभावे –कारकाभावे तदभावः–क्रियाभावः। कारकं क्रियाजनकं भवति न तु क्रिया कारकं जनयति तस्या

निर्जीवत्वात्। एवञ्च क्रियाजनकत्वमेव कारकत्वम्। अथ च व्याकरणसूत्रनिर्दिष्टविभक्त्यन्तत्वे सति क्रियाजनकत्वं कारकत्वं पर्यवस्यति। संज्ञाशब्दस्य सर्वनामशब्दस्य च यया अवस्थया क्रियायाः सम्बन्धो ज्ञायते सा अवस्था कारकमित्याधुनिकविदो वदन्ति।

तच्च षड्विधमिति प्रसिद्धम्–

कर्ता कर्म च करणं सम्प्रदानं तथैव च।

अपादानाधिकरणे इत्याहु कारकाणि षट्।। इति

इदं प्रत्येकमपिक्रियाजननं करोतीति कारकं भवति। तेन स्वेन स्वेन क्रियानिष्पादकत्वव्यापारेण परस्परऽभिन्नेन भिद्यते प्रत्येकम्। एवमिदं कारकस्वरूपं तद्वर्गीकरणञ्च –

## १. कर्तृकारकम्

कर्तुः स्वरूपं प्रतिपादयता भगवता पाणिनिना सूत्रितम् "स्वतन्त्रः कर्ता" (पाणिनिसूत्रम्.१.४.४५) इति। अस्यार्थश्च क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्तृसंज्ञको भवतीति। स्वातन्त्र्येणेत्यत्र स्वतन्त्रशब्दः प्रधानवाची। अत एवोक्तं कैयटेन – स्वशब्द आत्मवाची, स्वआत्मा तन्त्रं प्रधानं यस्य स्वतन्त्र उच्यते ( महाभाष्यप्रदीपः१.४.५४.पृ.२७७) इति।

भाष्यकृता पतञ्जलिनाऽपि स्वातन्त्र्यस्य प्राधान्यमेवार्थः स्वीकृतः। एवञ्च स्वातन्त्र्यञ्च प्रधानभूतधात्वर्थाश्रयत्वम्। ननु कर्मणि प्रत्यये देवदत्तेन ओदनः पच्यते इत्यादौ देवदत्तनिष्ठव्यापारस्य नव्यमते प्राधान्याभावः। यतो हि नव्यानां मते तत्र फलविशेष्यक एव बोधः। तत्र देवदत्तस्य प्रधानीभूतधात्वर्थाश्रयत्वाभावात् कर्तृत्वं न भवेदिति चेत् ? तत्र देवदत्तस्य कर्तृत्वसिद्धये उक्ते लक्षणे कर्तृप्रत्ययसमभिव्याहारे इत्यपि विशेषणं देयम्। अत एव नागेशेन स्वातन्त्र्यञ्च कर्तृप्रत्ययसमभिव्याहारे प्रधानीभूतधात्वर्थाश्रयत्वम्। रामः पुस्तकं पठति इत्यादौ कर्तुः रामस्य पठनव्यापारजनकत्वं कारकान्तरव्यापारजनकत्वञ्च तज्जनकत्वात् कर्तृकारकम्।

## २. कर्मकारकम्

षट्कारकमध्ये द्वितीयं कारकं कर्मकारकम्। "कर्तुरीप्सिततमं कर्मः" ( पाणिनिसूत्रम्.१.४.४९) इति सूत्रेण कर्मसंज्ञा विधीयते। अस्य सूत्रस्यार्थश्च कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं भवतीति। "कर्मणि द्वितीया"(पाणिनिसूत्रम्.२.३.२) इति पाणिनिसूत्रानुशासनात् कर्मत्वमेव द्वितीयार्थ इति। यद्यपि कर्मसंज्ञा "कर्तुरीप्सिततमं कर्म" इति सूत्रेण विधीयते किन्तु द्वितीयाविधायके सूत्रे कर्मपदेन क्रियाजन्यफलाश्रय एव गृह्यते, उक्तेच्छोद्देश्यताश्रयत्वरूपकर्मत्वस्वीकारे "तथायुक्तं चानीप्सितम्" इति सूत्रेण विधीयमाने द्वितीया न स्यात्। तस्मात् क्रियाजन्यफलाश्रयरूपकर्मणि द्वितीयाविधानादाश्रय एव द्वितीयार्थः। भक्तो हरिं भजति इत्यादौ हर्यादेः क्रियाफलोद्देश्यीभवनं व्यापार इति तस्य कर्मकारकत्वम्।

## ३. करणकारकम्

तृतीयाविभक्तिः ( टा, भ्याम्, भिस् ) अनुक्ते कर्तरि करणे च विधीयते "कर्तृकरणयोस्तृतीया" (पाणिनिसूत्रम्.१.४.४५) इति सूत्रेण। रामेण बाणेन हतो बाली इत्यत्र रामकर्तृबाणकरणकहिंसाक्रियाविषयो

बालीत्यर्थः (सिद्धान्तकौमुदी.बालमनोरमा. पृ. ४०१) तृतीया द्विविधा। कर्तृतृतीया, करणतृतीया च। एवञ्च कर्तृकारकतृतीया, करणकारकतृतीया, उपपदतृतीया चेति भेदात् तृतीया त्रिविधापि भवति। कर्तृतृतीयाया आश्रयोऽर्थः। तथा चोक्तम् – द्वितीयातृतीयासप्तमीनामाश्रयोऽर्थः (वैयाकरणभूषणसार सुबर्थनिर्णयः. पृ. १६९)। तथाहि कर्तरि विधीयमानायाः तृतीयायाः कर्तृत्वमेवार्थो युक्तः। कर्तृत्वञ्च प्रधानधात्वर्थव्यापाराश्रयत्वमेव। तत्र व्यापारस्य धातुलभ्यत्वादनन्यलभ्यो हि शब्दार्थ इति रीत्याऽऽश्रयत्वमेव कर्तृतृतीयार्थः फलति। करणतृतीयाया आश्रयो व्यापारश्चार्थः। तथा चोक्तम् – करणतृतीयायास्त्वाश्रयव्यापारौ वाच्यौ। आश्रयव्यापारयोः परस्परं वृत्तित्वसम्बन्धेनान्वयः। आश्रयो च प्रकृत्यर्थाभेदसम्बन्धेन विशेषणम्। व्यापारस्य तु जन्यत्वसम्बन्धेन धात्वर्थे फलेऽन्वयः। फलस्यानुकूलसम्बन्धेन धात्वर्थव्यापारेऽन्वयः। तथा च कुठारेण वृक्षं छिनत्तीत्यादौ कुठाराभिन्नाश्रयवृत्तिव्यापारजन्यवृक्षच्छेदनानुकूलो व्यापार इति बोधः।

करणकारकस्य स्वरूपं प्रतिपादयता आचार्येण पाणिनिना सूत्रितम् "साधकतमं करणम्" (पाणिनिसूत्रम्.१.४.४२) इति। अस्यार्थश्च क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं भवतीति। हरिः लेखन्या लिखति इत्यादौ करणरूपाया लेखन्याः फलजनकाव्यवहितो व्यापार इति तज्जनकत्वात्तस्याः करणकारकत्वम्।

### ४. सम्प्रदानकारकम्

"चतुर्थी सम्प्रदाने"(पाणिनिसूत्रम्.२.३.१३) इति पाणिन्यनुशासनात् सम्प्रदानत्वं चतुर्थ्यर्थः। शक्तिमत् कारकमिति पक्षः सम्प्रदानचतुर्थ्यर्थः। उक्तञ्च शेखरकारेण सम्प्रदानत्वशक्तिमान् सम्प्रदानचतुर्थ्यर्थः। "कर्मणा यमभिप्रैति स सम्प्रदानम्"(पाणिनिसूत्रम्.१.४.३२) इति सूत्रं सम्प्रदानसंज्ञां करोति। कर्मसंज्ञकेन गवादिद्रव्येण यमभिप्रैति शेषित्वेनाध्यवस्यति स सम्प्रदानमित्यर्थः। (बालमनोरमा सिद्धान्तकौमुदी.पृ. ४०५)

राजा विप्राय गां ददाति इत्यादौ सम्प्रदानस्य विप्रादेर्दानप्रेरणानुमत्यादिव्यापारजनकत्वमिति तस्य सम्प्रदानत्वम्।

### ५. अपादानकारकम्

"अपादाने पञ्चमी" (पाणिनिसूत्रम्.२.३.२८) इति सूत्रेणापादाने पञ्चमी विधानादपादानमेव पञ्चम्यर्थः। यस्मिन्नर्थे प्रत्ययः प्रत्ययस्यापि स एवार्थ इति नियमात्। वृक्षात् पत्रं पतति, ग्रामादायाति, धावतोऽश्वात् पतति इत्यादीन्युदाहरणानि। वृक्षात् पत्रं पतति इत्यादौ वृक्षरुपस्यापादानस्यावधीभवनमवधिभावोपगमो वा व्यापार इति तज्जनकत्वात् तस्यापादानकारकत्वम्।

### ६. अधिकरणकारकम्

"सप्तम्यधिकरणे च" (पाणिनिसूत्रम्.२.३.३६) इति सूत्रानुशासनात् अधिकरणे सप्तमी विधानेन अधिकरणत्वमेव सप्तम्यर्थ इति। "आधारोऽधिकरणम्" (पाणिनिसूक्रम्.१.४.४५) इति सूत्रेण कर्तृकर्मद्वारा तन्निष्ठक्रियाधारस्याधिकरणसंज्ञाविधानात्। तत्र अधिकरणकारकस्य भेदत्रयं स्वीकृतम्। अभिव्यापकम्, औपश्लेषिकम्, वैषयिकञ्चेति।

१) अभिव्यापकम्

यथा – दध्नि सर्पिः, तिलेषु तैलम्।

(२) औपश्लेषिकम्

यथा – कटे आस्ते, मथुरायां वसति।

(३) वैषयिकम्

यथा – खे शकुनयः, गुरौ वसति।

देवदत्तः कटे आस्ते, पाचकः स्थाल्यामोदनं पचति इत्यादौ कटस्थाल्यधिकरणयोः कर्तृकर्माव्यवहितक्रियाधारणं व्यापार इति तज्जनकत्वात्तयोरधिकरणकारकत्वम्।

सम्बन्धस्य तु न कारकत्वम्, देवदत्तस्य पुत्रं पन्थानं पृच्छति इत्यादौ देवदत्तादेःषष्ठ्यन्तस्यपुत्रेण सह सम्बन्धात् प्रश्नक्रियासम्बन्धाभावेन क्रियाजनकत्वविरहात्। सम्बोधनस्यापि न तत्वम्, हे राजन् सार्वभौमो भव इत्यादौ भवनक्रियायाः राजञ्शब्देन सह योगाभावेन तस्य तज्जनकत्वाभावात्।

अपादानसम्प्रदानकरणाधारकर्मणाम्।

कर्तुश्चोभयसम्प्राप्तौ परत्वेन प्रवर्तते।।

इत्यभियुक्तोक्त्यनुसारेण कारकाणां बाध्यबाधकभावो विज्ञेयः अपादानसम्प्रदानकरणाधिकरणापेक्षया कर्मणो बलवत्त्वम्, अपादानसम्प्रदानकरणापेक्षया अधिकरणस्य बलवत्त्वम्, अपादानसम्प्रदानापेक्षया करणस्य, अपादानापेक्षया च सम्प्रदानस्य बलवत्त्वम्, कर्तृकारकस्य तु सर्वतो बलवत्त्वमिति वेदनीयं प्रक्रियाविद्भिः।

## कारकसम्बद्धा पौरस्त्यावधारणा

पौरस्त्यभाषाचिन्तकानां समाजे सर्वातिशायिनीं प्रतिष्ठामादधाने भगवता पाणिनिना स्वयं वृद्धिगुणादेरिव स्वतन्त्रकारकस्य परिभाषा नाभिहिता किन्तु लोकसिद्धामन्वर्थसंज्ञामादायैव "कारके" इत्यधिकारसूत्रमेव व्याहृतम्। तदेव सूचयता महाभाष्यकारेण "कारके" (पाणिनिसूत्रम्.१.४.२३) सूत्रे अन्वर्थसंज्ञा यथा विज्ञायेत करोतीति कारकमित्युक्तम्। तत्रैव "साध्यत्वेन क्रियैव शब्दात् प्रतीयते इति क्रियानिर्वर्तकस्य कारकसंज्ञा प्रवर्तते" इति रीत्या कैयटेन सूत्रकाराशयः स्फुटमुद्धाटितोऽवाप्यते। एतावता कारकमित्यध्यवसीयते।

तत्रक्रियानिवर्तकं किं नामवाच्यं सिद्धद्रव्यमाहोस्वित् सिद्धद्रव्यनिष्ठा शक्तिः ? यदि द्रव्यमेव कारकं मन्येत तदा लोके स्थाल्यादिसिद्धद्रव्यस्य सदैव एकरूपतादर्शनात् स्थालीगतनानाकार्यवैचित्र्यं नानुभूयेत। किन्तु लोके "स्थाल्यां पचति", "स्थाल्या पचति", "स्थाली पचति" इत्येवंरूपं कार्यवैचित्र्यमेकस्याः स्थाल्याः प्रतीयते।

अथ च यदा महानसे इन्धनम्, अग्निः स्थाली, जलं तण्डुलाः, देवदत्तश्चेमानि द्रव्याणि विशकलितरूपेणोपस्थितानि तदा पचतीति व्यवहारो नोपपद्यते। यदा च तानि द्रव्याणि स्वगतशक्तिद्योतनपूर्वकं मिथः संयुक्तानि भूत्वा क्रियानिवर्तनाय प्रभवन्ति तदैव पचतीति व्यवहारो युज्यते। अतो महाभाष्यकारेण "गुणसमुदायः साधनम्", "साधनमप्यनुमानगम्यम्" इत्युक्तम्। तत्र गुणस्य द्रव्याश्रितत्वमेव प्रसिद्धम्। तेन द्रव्याश्रितगुणररूपशक्तिसमुदायः साधनाय कल्पते न तु द्रव्यमिति भाष्याभिप्रायो गम्यते।

एवमेव वाक्यपदीयकारेणापि –

क्रियायामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः।

शक्तिमात्रासमूहस्य विश्वस्यानेकधर्मणः।।

सर्वदा सर्वथा भावात् क्वचित् किञ्चित् विवक्षते।। (वाक्यपदीयम्.३.७.१–२)

इत्यभिधाय प्रतिद्रव्यमनेकाशशक्तयोऽभ्युपगता। तत्र विवक्षानुसारेण या या द्रव्यगता शक्तिरुद्बोधयितुं प्रकाम्यते विभक्तिसंबलनफुरस्सरं सा सा शक्तिरुद्बोध्यते सैवोद्बुद्धा शक्तिसाधनं तद्धि क्रियानिर्वर्तकमित्यवसितम्। यथा मीमांसकसिद्धान्ते शक्तेर्व्यतिरिक्तपदार्थोऽभिमतः। वैयाकरणमतेऽपि शक्तेर्द्रव्याद् व्यतिरिक्तत्वं विभाति। सैव क्रियानिष्पादिका कारकापर्याया च क्राडीकृता। तत्र द्रव्यस्य साधनत्वन्तु शक्तिद्वारीकृत्यैव प्रकल्पते। शक्तिस्तु साक्षादेव साधनाय कल्प्यत इति विज्ञायते। एतावता क्रियानिर्वर्तिका द्रव्यनिष्ठाशक्तिरेव कारकमिति वैयाकरणानां दार्शनिको सिद्धान्तः।

व्यावहारिकदृशा विचारणे लोके वाक्यादेव कश्चनाभिप्रेतः परिपूर्णार्थो गम्यते। तत्र वाक्यस्य विशेषणे प्रायशो न्यूनतमेऽप्येकं नामपदमपरमाख्यातपदञ्च संघटिते भवतः। वाक्ये क्रियया सह नामपदार्थो नियतसम्बन्धं निदधाति। नामार्थानां व्रियासम्बन्ध एव व्याकरणशास्त्रे कारकनाम्नाऽभिधीयते। तत्रक्रिया साध्या कारकं साधनञ्च मन्यते।

कारकस्य क्रियासम्बन्धमाश्रित्य विविधानि कारकलक्षणानि शास्त्रकारैर्निरूपितानि सन्ति। तत्रक्रियानिमित्तत्वं कारकत्वमिति काशिकाकारस्याभिमतं प्राप्यते। तत्र लक्षणे "चैत्रस्य तण्डुलान् पचति" इत्यत्र कारकातिप्रसङ्गः। अतो दीक्षितप्रभृतिप्राचीनवैयाकरणैः क्रियान्वयित्वं कारकत्वमिति कारकलक्षणं निरुप्यते। नव्यवैयाकरणास्तु क्रियाजनकत्वं कारकत्वमिति कारकलक्षणं स्वीकुर्वन्ति।

एतादृशानि साक्षात् परम्परया वा क्रियाजनकानि कारकाणि कर्तृकर्मकरणसम्प्रदानापादानाधिकरणाख्यानि षड् विधानि मतानि।

कारकाद्यर्थप्रकाशनाय प्रथमतः सप्तमीपर्यन्ता विभक्तयो प्रातिपदिकाद् विधीयन्ते। ता विभक्तयो द्विविधा मताः। कारकविभक्तय उपपदविभक्तयश्च। तासां व्यवस्था च भगवता पाणिनिना कारकप्रकरणे विहिताः। कारकोपपदविभक्त्योर्युगपत्प्राप्तौ कारकविभक्तेरेव प्राबल्यम्। पुनः कारकाणां मिथो युगपत्प्राप्तै तु क्रमश अपादानसम्प्रदानकरणाधिकरणकर्मकर्तृकारकाणामुत्तरोत्तरस्य बलीयस्त्वं मतम्।

**विभक्तिविभागः**

| क्र.सं. | विभक्तयः | प्रत्ययाः | कारकनामानि |
|---|---|---|---|
| १ | प्रथमा | सु, औ, जस् | कर्ता |
| २ | द्वितीया | अम्, औट्, शस् | कर्म |
| ३ | तृतीया | टा, भ्याम्, भिस् | करणम् |
| ४ | चतुर्थी | ङे, भ्याम्, भ्यस् | सम्प्रदानम् |
| ५ | पञ्चमी | ङसि, भ्याम्, भ्यस् | अपादानम् |
| ६ | षष्ठी | ङस्, ओस्, आम् | × |
| ७ | सप्तमी | ङि, ओस्, सुप् | अधिकरणम् |

यद्यपि सु, औ, जस् इत्यादयः प्रत्ययाः तथापि "विभक्तिश्च"इत्यनेन विभक्तिसंज्ञाकरणेन तेषां विभक्तिनामधेयत्वं ज्ञेयम्। अत्र कारकसम्बन्धीनि विविधमतानि प्रस्तूयन्ते यत् –

• क्रियायाःसाधनं षोढांकारकं तत् क्रियान्वयि–सोमनाथः

•क्रियानिमित्तत्वं कारकत्वम् – काशिकाकारः

•क्रियान्वयित्वं कारकत्वम् – दीक्षितप्रभृतिप्राचीनवैयाकरणाः

•क्रियाजनकत्वं कारकत्वम् – नव्यवैयाकरणाः

**कारकसम्बद्धा पाश्चात्यावधारणा**

उपरि चर्चितानुसारेण पाणिनीयपरम्परायां वाक्ये क्रियानामार्थानां मिथो विनियोगसिद्धान्तं कार्यकारणभावसिद्धान्तञ्चावलम्ब्य कारकाणि परिभाषितानि, षट्कारकाणि निर्धारितानि चाधिगम्यन्ते। पाश्चात्यपरम्परायामपि पाश्चात्यभाषाचिन्तकैः कारकविषये विशिष्टविचाराः समुपस्थिताः प्राप्यन्ते। तत्र अमेरिकादेशस्थः सुप्रथितो भाषावैज्ञानिको नोम् चम्स्किमहाशयः (ई . सं १९२८) वाक्येष्वधिशासनसिद्धान्तं ( Government Theory) पुरस्कृत्य कारकाणि सम्परीक्ष्य निर्धारयति। स महाशयो हि राजनीतिचिन्तनस्य पृष्ठभूमितः समायातः। अतो भाषाचिन्तनेऽपि शासकीय चिन्तनमग्रे सारयित्वा कारकविश्लेषणं प्रस्तौति। प्रथमतः स प्रत्येकं नामपदं कारकग्रहणविशेषतां निर्वोढुं समर्थयत इति निश्चिनोति। तदनुवाक्येषु संरचनागतदृशा कतिपयानि पदान्यधिशासकानि कतिपयानि चाधिशासितानि बोभूयन्त इति विश्लेषयति।

तत्र वाक्येष्वधिशासनस्य चतस्रः कोटयः परिलक्ष्यन्ते।

१. सहायकक्रिययाऽधिशासितं नामपदम्।

२. मुख्यक्रिययाऽधिशासितं नामपदम्।

३. पूर्वसर्गेणाऽधिशासितं नामपदम्।

४. नामपदेनाऽधिशासितं नामपदम्।

**१. आङ्ग्लझाषादृष्ट्या सहायकक्रिययाऽधिशासितमुभयभूतं नामपदं वाक्ये कर्तृकारकं लभते।** तथाहि –

क. Ram eats rice, Rams eat rice.

ख. Ram is eating rice. Rams are eating rice.

ग. Ram has eaten rice.

घ. Rams have eaten rice.

इत्यादिवाक्येषु eats, eat इत्यत्र मुख्य क्रियायां क्रमशः eats इति मूर्तसंरचनायुता, एवं is, are, has, have इत्याद्याः सहायकक्रिया अभिमताः। ता हि Ram इति नामपदमेकवचनबहुवचनसंरचनाग्रहणार्हत्वेनाधिशासति। तथाधिशासितं च्च इत्याद्युद्देश्यात्मकं नामपदं सर्वत्रैव कर्तृकारके (Nominative case) समाविष्टं भवति।

**२. विधेयरूपया हि मुख्य क्रिययाधिशासितं विधेयविस्तारभूतं नामपदं कर्मकारकं** ( Objectivecase) **लभते।** तथाहि –

क. Hari eats mango .ख. Students read story.

इत्यादिवाक्ये विधेयविस्तारभूते mango, story इति नामपद eat, read इति मुख्यक्रियाभ्यामधिशासिते स्तः। वाक्ये तथाविधानि नामपदानि कर्मकारकं ( Objective case) भजन्ते।

**३. आङ्ग्लभाषानुसारेण in, on, by इत्यादिशब्दाः पूर्वसर्गरूपेण व्यपदिश्यन्ते।** तैरपि नामपदं वाक्येऽधिशासितं भवति। पूर्वसर्गेणाधिशासितानि तथविधानि नामपदानि तिर्यक्कारकरूपेण ( Oblique case) सम्मतानि। तथाहि –

क)Students stay in the room.

ख) Books are on the table.

ग) Ram went house by bus.

आङ्ग्लभाषा खलु शीर्षाग्रभाषा मन्यते। अतः प्रकृतवाक्ये in, on, by इति शीर्षतयाग्रप्रयुक्ताः सन्ति। तादृशाः पूर्वसर्गास्तदुरवर्ति नामपदमधिशासति। वाक्ये तैरधिशासितानि room, table, bus इति नामानि तिर्यक्कारके अन्तर्भवन्ति।

**४. वाक्ये नाम्नो विशेषकरूपेण स्थितं नामपदं विशेष्यनामपदद्वाराधिशासितं सत् कारकत्वं लभते।** तच्च सम्बन्धकारकत्वेन ( Genetive case) अभ्युपगम्यते।

तथाहि –

क. It is Ram’s book. इत्यादौ book इत्यस्य विशेषकरूपेणोपस्थितम् Ram’s इति संबन्धकारकमभ्युपगच्छति चम्स्किमहाशयः। इति।

## उपसंहारः

इत्थं लेखेऽस्मिन् कारकत्वविषये कारके इति सूत्रमवलम्ब्य नैयायिकाः व्याकुर्वन्ति विभक्त्यर्थद्वारा क्रियान्वयित्वं कारकत्वमिति। ऊक्तञ्च – इत्थञ्च क्रियान्वयित्वं कारकत्वमिति प्राचीनलक्षणं सङ्गच्छते। तत्तद्विभक्तिजन्योपस्थितिविशेष्यताकत्वं कर्तृत्वं करणत्वं सम्प्रदानत्वमपादानत्वमधिकरणत्वं नानाविधं कारकपदस्य शक्यम्। तथा च क्रियाविषयतानिरूपित विभक्त्यर्थविषयताश्रयत्वं कारकत्वमिति तेषां परिष्कृतोऽर्थः।

तथा च स्तोकं पचतीत्यादौ स्तोकादीनां चैत्रस्य तण्डुलं पचतीत्यादौ चैत्रादीनाञ्च नकारकत्वमिति, विभक्त्यर्थद्वाराक्रियान्वयित्वाभावात्। क्रियान्वयित्वमेव कारकत्वमिति प्राचीनवैयाकरणाः स्वीकुर्वन्ति। कारकेति महासंज्ञया करोति स्वसम्बन्धेन क्रियायां विशेषरूपतामापादयतीति व्युत्पत्तेः। अत एव कारकाणां क्रियायामन्वय इति व्यवहारस्सङ्गच्छते। ब्राह्मणस्य पुत्रं पृच्छतीत्यादौ तु ब्राह्मणादीनां न कारकत्वं क्रियान्वयित्वाभावात्।

नागेशादिनव्यास्तु क्रियानिष्पादकत्वं कारकत्वमिति स्वीकुर्वन्ति। तत्र निष्पादयत्युत्पादयतीति व्युत्पत्या निष्पादको जनकः। यतो हि क्रियाजनकत्वमेव कारकत्वमिति लभ्यते। जनकत्वं नाम कारणत्वरूपम्। कारणत्वञ्च अन्यथासिद्धिशून्यत्वे सति कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्यसमानाधिकरणाऽत्यन्ताभाव प्रतियोगितानवच्छेदकधर्मवत्वम्। चैत्रस्य तण्डुलं पचति, ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यादौ चैत्रब्राह्मणादीनामन्यथासिद्धत्वेन क्रियाजनकत्वाभावान्न कारकत्वम्। उक्तञ्च – ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यादौ ब्राह्मणस्य न कारकत्वम्, पुत्रेणान्यथासिद्ध्या तत्त्वाभावात्।

भाष्ये चोक्तं पतञ्जलिना – कारक इति महतीसंज्ञा क्रियते संज्ञा च नाम यतो न लघीयः, तत्र महत्याः संज्ञायाः करणे एतत् प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत करोतीति कारकमिति। तद्व्याख्यानं कुर्वता कैयटनोक्तम् – साध्यत्वेन क्रियैव शब्दात्प्रतीयत इति क्रियायाः निर्वर्तकस्य कारकसंज्ञाऽपादानादिसंज्ञा च प्रवर्तते।

तस्मात् क्रियाजनकत्वं कारकत्वमिति लक्षणं भाष्यसम्मतमस्ति। पटं करोति, घटं स्मरतीत्यादौ तु तन्तुनिष्ठजनकत्वस्य, एवं सम्बन्धिनिष्ठज्ञानजनकत्वस्य च घटपटादि आरोपेण दोषाभावात्। एतेषां सर्वेषां तत्तदाचार्यैः कृतानां कारकस्वरूपाणां विचारपूर्वकावलोकनेन ज्ञायते, क्रियया सह कारकाणां सम्बन्धविशेषो भवत्येवेति।

**कृतज्ञताज्ञापनम्**

प्रस्तुतस्यालेखस्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च सम्यग्रूपेण परीक्षणं विधाय परिष्काराय सम्पादनाय चोपकारं कृतवद्भ्यो प्राविधिकविषयविज्ञजनेभ्योऽन्येभ्यः सहयोगिभ्यश्च धन्यवादं व्यनज्मि।

**सन्दर्भग्रन्थाः**

आचार्यः, शिवराज कौण्डिन्यायनः (ई.२०११) *पाणिनीयशिक्षा*, वाराणसीः चौखम्बा विद्याभवनप्रकाशन।

कण्डेल, भीमप्रसादः (२०७४) *लघुशब्देन्दुशेखरः, कलावतीव्याख्योपेतः(कारकादव्ययीभावान्तो भागः)*, काष्ठमण्डपम् ओजराज उपाध्यायलोहनी।

त्रिपाठी, ब्रह्मानन्द (२०१४) *अमरकोषः*, वाराणसीः चौखम्बा सुरभारतीप्रकाशन।

त्रिपाठी, ब्रह्मानन्द (२०१६) *रूपचन्द्रिका*, वाराणसीः चौखम्बा सुरभारतीप्रकाशन।

दाहाल, लोकमणिः (२०४६) *व्याकरणशास्त्रेतिहासः*, वाराणसीः भारतीयविद्याप्रकाशन।

पाण्डेयः, श्री गोपालदत्तः (ई.२०१५) *पाणिनि–विरचिता अष्टाध्यायी*, वाराणसीः चौखम्बा सुरभारतीप्रकाशन।

पाण्डेयःश्री गोपालदत्तः (२०१३) *वैयाकरणसिद्धान्तकौमुदी(प्रथमो भागः) बालमनोरमाव्याख्याः*, वाराणसीः चौखम्बा सुरभारतीप्रकाशन।

शर्मा, गोविन्दप्रसाद (२०४७) *पाणिनीयव्याकरणस्यैतिहासिकं परिशीलनम्,* शोधपूर्णो निबन्धः, यतिराजग्रन्थमालाप्रकाशन।

शर्मा, गोविन्दप्रसाद (२०१५) *लघुसिद्धान्तकौमुदी,* वाराणसीः चौखम्बा सुरभारतीप्रकाशन।